# viShNusahasranAmastotram from Garuda Purana

# વિષ્ણુસહસ્રનામસ્તોત્રમ્ ગરુડપુરાણાન્તર્ગતમ્

## Document Information

Text title : viShNusahasranAmastotra 3 from garuDapurANa

File name : viShNusahasranAmastotragaruDapurANa.itx

Category : sahasranAma, vishhnu, vishnu, stotra, garuDapurANa

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description-comments : garuDapurANa | pUrvakhaNDa |adhyAya 15/2-160||

Latest update : November 24, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 3, 2024

*sanskritdocuments.org*

viShNusahasranAmastotram from Garuda Purana

# વિષ્ણુસહસ્રનામસ્તોત્રમ્ ગરુડપુરાણાન્તર્ગતમ્

રુદ્ર ઉવાચ ।
સંસારસાગરાદ્ઘોરાન્મુચ્યતે કિં જપન્પ્રભો ।
નરસ્તન્મે પરં જપ્યં કથય ત્વં જનાર્દન ॥ ૧॥

હરિરુવાચ ।
પરેશ્વરં પરં બ્રહ્મ પરમાત્માનમવ્યયમ્ । var ઈશ્વરમ્ પરમં
વિષ્ણું નામસહસ્રેણ સ્તુવન્મુક્તો ભવેન્નરઃ ॥ ૨॥

યત્પવિત્રં પરં જપ્યં કથયામિ વૃષધ્વજ ! ।
શ‍ૃણુષ્વાવહિતો ભૂત્વા સર્વપાપવિનાશનમ્ ॥ ૩॥

ૐ વાસુદેવો મહાવિષ્ણુર્વામનો વાસવો વસુઃ ।
બાલચન્દ્રનિભો બાલો બલભદ્રો બલાધિપઃ ॥ ૪॥

બલિબન્ધનકૃદ્વેધા (૧૧) વરેણ્યો વેદવિત્કવિઃ ।
વેદકર્તા વેદરૂપો વેદ્યો વેદપરિપ્લુતઃ ॥ ૫॥

વેદાઙ્ગવેત્તા વેદેશો (૨૦) બલાધારો બલાર્દનઃ । var બલધારો
અવિકારો વરેશશ્ચ વરુણો વરુણાધિપઃ ॥ ૬॥

વીરહા ચ બૃહદ્વીરો વન્દિતઃ પરમેશ્વરઃ (૩૦) ।
આત્મા ચ પરમાત્મા ચ પ્રત્યગાત્મા વિયત્પરઃ ॥ ૭॥

પદ્મનાભઃ પદ્મનિધિઃ પદ્મહસ્તો ગદાધરઃ ।
પરમઃ (૪૦) પરભૂતશ્ચ પુરુષોત્તમ ઈશ્વરઃ ॥ ૮॥

પદ્મજઙ્ઘઃ પુણ્ડરીકઃ પદ્મમાલાધરઃ પ્રિયઃ ।
પદ્માક્ષઃ પદ્મગર્ભશ્ચ પર્જન્યઃ (૫૦) પદ્મસંસ્થિતઃ ॥ ૯॥

અપારઃ પરમાર્થશ્ચ પરાણાં ચ પરઃ પ્રભુઃ ।
પણ્ડિતઃ પણ્ડિતેડ્યશ્ચ પવિત્રઃ પાપમર્દકઃ ॥ ૧૦॥ var પણ્ડિતેભ્યશ્ચ

શુદ્ધઃ (૬૦) પ્રકાશરૂપશ્ચ પવિત્રઃ પરિરક્ષકઃ ।
પિપાસાવર્જિતઃ પાદ્યઃ પુરુષઃ પ્રકૃતિસ્તથા ॥ ૧૧॥

પ્રધાનં પૃથિવીપદ્મં પદ્મનાભઃ (૭૦) પ્રિયપ્રદઃ ।
સર્વેશઃ સર્વગઃ સર્વઃ સર્વવિત્સર્વદઃ સુરઃ ॥ ૧૨॥ var પરઃ
સર્વસ્ય જગતો ધામ સર્વદર્શી ચ સર્વભૃત્ (૮૦) ।
સર્વાનુગ્રહકૃદ્દેવઃ સર્વભૂતહૃદિસ્થિતઃ ॥ ૧૩॥

સર્વપૂજ્યશ્ચ સર્વાદ્યઃ સર્વદેવનમસ્કૃતઃ । var સર્વપઃ સર્વપૂજ્યશ્ચ
સર્વસ્ય જગતો મૂલં સકલો નિષ્કલોઽનલઃ (૯૦) ॥ ૧૪॥

સર્વગોપ્તા સર્વનિષ્ઠઃ સર્વકારણકારણમ્ ।
સર્વધ્યેયઃ સર્વમિત્રઃ સર્વદેવસ્વરૂપધૃક્ ॥ ૧૫॥

સર્વાધ્યક્ષઃ સુરાધ્યક્ષઃ સુરાસુરનમસ્કૃતઃ । var સર્વાધ્યાયઃ
દુષ્ટાનાં ચાસુરાણાં ચ સર્વદા ઘાતકોઽન્તકઃ (૧૦૧) ॥ ૧૬॥

સત્યપાલશ્ચ સન્નાભઃ સિદ્ધેશઃ સિદ્ધવન્દિતઃ ।
સિદ્ધસાધ્યઃ સિદ્ધસિદ્ધઃ સાધ્યસિદ્ધો હૃદીશ્વરઃ ॥ ૧૭॥ var સિદ્ધિસિદ્ધો
શરણં જગતશ્ચૈવ (૧૧૦) શ્રેયઃ ક્ષેમસ્તથૈવ ચ ।
શુભકૃચ્છોભનઃ સૌમ્યઃ સત્યઃ સત્યપરાક્રમઃ ॥ ૧૮॥

સત્યસ્થઃ સત્યસઙ્કલ્પઃ સત્યવિત્સત્યદસ્તથા (૧૨૧) । var સત્પદસ્તથા
ધર્મો ધર્મીચ કર્મીચ સર્વકર્મવિવર્જિતઃ ॥ ૧૯॥

કર્મકર્તા ચ કર્મૈવ ક્રિયા કાર્યં તથૈવ ચ ।
શ્રીપતિર્નૃપતિઃ (૧૩૧) શ્રીમાન્સર્વસ્ય પતિરૂર્જિતઃ ॥ ૨૦॥

સ દેવાનાં પતિશ્ચૈવ વૃષ્ણીનાં પતિરીડિતઃ । var પતિરીરિતઃ
પતિર્હિરણ્યગર્ભસ્ય ત્રિપુરાન્તપતિસ્તથા ॥ ૨૧॥

પશૂનાં ચ પતિઃ પ્રાયો વસૂનાં પતિરેવ ચ (૧૪૦) ।
પતિરાખણ્ડલસ્યૈવ વરુણસ્ય પતિસ્તથા ॥ ૨૨॥

વનસ્પતીનાં ચ પતિરનિલસ્ય પતિસ્તથા ।
અનલસ્ય પતિશ્ચૈવ યમસ્ય પતિરેવ ચ ॥ ૨૩॥

કુબેરસ્ય પતિશ્ચૈવ નક્ષત્રાણાં પતિસ્તથા ।
ઓષધીનાં પતિશ્ચૈવ વૃક્ષાણાં ચ પતિસ્તથા (૧૫૦) ॥ ૨૪॥

નાગાનાં પતિરર્કસ્ય દક્ષસ્ય પતિરેવ ચ ।
સુહૃદાં ચ પતિશ્ચૈવ નૃપાણાં ચ પતિસ્તથા ॥ ૨૫॥

ગન્ધર્વાણાં પતિશ્ચૈવ અસૂનાં પતિરુત્તમઃ ।
પર્વતાનાં પતિશ્ચૈવ નિમ્નગાનાં પતિસ્તથા ॥ ૨૬॥

સુરાણાં ચ પતિઃ શ્રેષ્ઠઃ (૧૬૦) કપિલસ્ય પતિસ્તથા ।
લતાનાં ચ પતિશ્ચૈવ વીરુધાં ચ પતિસ્તથા ॥ ૨૭॥

મુનીનાં ચ પતિશ્ચૈવ સૂર્યસ્ય પતિરુત્તમઃ ।
પતિશ્ચન્દ્રમસઃ શ્રેષ્ઠઃ શુક્રસ્ય પતિરેવ ચ ॥ ૨૮॥

ગ્રહાણાં ચ પતિશ્ચૈવ રાક્ષસાનાં પતિસ્તથા ।
કિન્નરાણાં પતિશ્ચૈવ (૧૭૦) દ્વિજાનાં પતિરુત્તમઃ ॥ ૨૯॥

સરિતાં ચ પતિશ્ચૈવ સમુદ્રાણાં પતિસ્તથા ।
સરસાં ચ પતિશ્ચૈવ ભૂતાનાં ચ પતિસ્તથા ॥ ૩૦॥

વેતાલાનાં પતિશ્ચૈવ કૂષ્માણ્ડાનાં પતિસ્તથા ।
પક્ષિણાં ચ પતિઃ શ્રેષ્ઠઃ પશૂનાં પતિરેવ ચ ॥ ૩૧॥

મહાત્મા (૧૮૦) મઙ્ગલો મેયો મન્દરો મન્દરેશ્વરઃ ।
મેરુર્માતા પ્રમાણં ચ માધવો મલવર્જિતઃ ॥ ૩૨॥ var મનુવર્જિતઃ
માલાધરો (૧૯૦) મહાદેવો મહાદેવેન પૂજિતઃ ।
મહાશાન્તો મહાભાગો મધુસૂદન એવ ચ ॥ ૩૩॥

મહાવીર્યો મહાપ્રાણો માર્કણ્ડેયર્ષિવન્દિતઃ (૨૦૦) । var પ્રવન્દિતઃ
માયાત્મા માયયા બદ્ધો માયયા તુ વિવર્જિતઃ ॥ ૩૪॥

મુનિસ્તુતો મુનિર્મૈત્રો (૨૧૦) મહાનાસો મહાહનુઃ । var મહારાસો
મહાબાહુર્મહાદાન્તો મરણેન વિવર્જિતઃ ॥ ૩૫॥ var મહાદન્તો
મહાવક્ત્રો મહાત્મા ચ મહાકાયો મહોદરઃ । var મહાકારો
મહાપાદો મહાગ્રીવો મહામાની મહામનાઃ ॥ ૩૬॥

મહાગતિર્મહાકીર્તિર્મહારૂપો (૨૨૨) મહાસુરઃ ।
મધુશ્ચ માધવશ્ચૈવ મહાદેવો મહેશ્વરઃ ॥ ૩૭॥

મખેજ્યો મખરૂપી ચ માનનીયો (૨૩૦) મખેશ્વરઃ । var મખેષ્ટો મહેશ્વરઃ
મહાવાતો મહાભાગો મહેશોઽતીતમાનુષઃ ॥ ૩૮॥

માનવશ્ચ મનુશ્ચૈવ માનવાનાં પ્રિયઙ્કરઃ ।
મૃગશ્ચ મૃગપૂજ્યશ્ચ (૨૪૦) મૃગાણાં ચ પતિસ્તથા ॥ ૩૯॥

બુધસ્ય ચ પતિશ્ચૈવ પતિશ્ચૈવ બૃહસ્પતેઃ ।
પતિઃ શનૈશ્ચરસ્યૈવ રાહોઃ કેતોઃ પતિસ્તથા ॥ ૪૦॥

લક્ષ્મણો લક્ષણશ્ચૈવ લમ્બોષ્ઠો લલિતસ્તથા (૨૫૦) ।
નાનાલઙ્કારસંયુક્તો નાનાચન્દનચર્ચિતઃ ॥ ૪૧॥

નાનારસોજ્જ્વલદ્વક્ત્રો નાનાપુષ્પોપશોભિતઃ ।
રામો રમાપતિશ્ચૈવ સભાર્યઃ પરમેશ્વરઃ ॥ ૪૨॥

રત્નદો રત્નહર્તા ચ (૨૬૦) રૂપી રૂપવિવર્જિતઃ ।
મહારૂપોગ્રરૂપશ્ચ સૌમ્યરૂપસ્તથૈવ ચ ॥ ૪૩॥

નીલમેઘનિભઃ શુદ્ધઃ સાલમેઘનિભસ્તથા । var કાલમેઘ
ધૂમવર્ણઃ પીતવર્ણો નાનારૂપો (૨૭૦) હ્યવર્ણકઃ ॥ ૪૪॥

વિરૂપો રૂપદશ્ચૈવ શુક્લવર્ણસ્તથૈવ ચ ।
સર્વવર્ણો મહાયોગી યજ્ઞો યજ્ઞકૃદેવ ચ ॥ ૪૫॥ var યાજ્યો
સુવર્ણવર્ણવાંશ્ચૈવ સુવર્ણાખ્યસ્તથૈવ ચ (૨૮૦) । var સુવર્ણો વર્ણ
સુવર્ણાવયવશ્ચૈવ સુવર્ણઃ સ્વર્ણમેખલઃ ॥ ૪૬॥

સુવર્ણસ્ય પ્રદાતા ચ સુવર્ણેશસ્તથૈવ ચ ।
સુવર્ણસ્ય પ્રિયશ્ચૈવ (૨૯૦) સુવર્ણાઢ્યસ્તથૈવ ચ ॥ ૪૭॥

સુપર્ણી ચ મહાપર્ણો સુપર્ણસ્ય ચ કારણમ્ (૨૯૦) ।
વૈનતેયસ્તથાદિત્ય આદિરાદિકરઃ શિવઃ ॥ ૪૮॥

કારણં મહતશ્ચૈવ પ્રધાનસ્ય ચ કારણમ્ । var પુરાણસ્ય
બુદ્ધીનાં કારણં ચૈવ કારણં મનસસ્તથા ॥ ૪૯॥

કારણં ચેતસશ્ચૈવ (૩૦૦) અહઙ્કારસ્ય કારણમ્ ।
ભૂતાનાં કારણં તદ્વત્કારણં ચ વિભાવસોઃ ॥ ૫૦॥

આકાશકારણં તદ્વત્પૃથિવ્યાઃ કારણં પરમ્ ।
અણ્ડસ્ય કારણં ચૈવ પ્રકૃતેઃ કારણં તથા ॥ ૫૧॥

દેહસ્ય કારણં ચૈવ ચક્ષુષશ્ચૈવ કારણમ્ ।
શ્રોત્રસ્ય કારણં (૩૧૦) તદ્વત્કારણં ચ ત્વચસ્તથા ॥ ૫૨॥

જિહ્વાયાઃ કારણં ચૈવ પ્રાણસ્યૈવ ચ કારણમ્ ।
હસ્તયોઃ કારણં તદ્વત્પાદયોઃ કારણં તથા ॥ ૫૩ ॥

વાચશ્ચકારણં તદ્વત્પાયોશ્ચૈવ તુ કારણમ્ ।
ઇન્દ્રસ્ય કારણં ચૈવ કુબેરસ્ય ચ કારણમ્ ॥ ૫૪ ॥

યમસ્ય કારણં ચૈવ (૩૨૦) ઈશાનસ્ય ચ કારણમ્ ।
યક્ષાણાં કારણં ચૈવ રક્ષસાં કારણં પરમ્ ॥ ૫૫ ॥

નૃપાણાં કારણં શ્રેષ્ઠં ધર્મસ્યૈવ તુ કારણમ્ । var ભૂષાણાં
જન્તૂનાં કારણં ચૈવ વસૂનાં કારણં પરમ્ ॥ ૫૬ ॥

મનૂનાં કારણં ચૈવ પક્ષિણાં કારણં પરમ્ ।
મુનીનાં કારણં શ્રેષ્ઠ (૩૩૦) યોગિનાં કારણં પરમ્ ॥ ૫૭ ॥

સિદ્ધાનાં કારણં ચૈવ યક્ષાણાં કારણં પરમ્ ।
કારણં કિન્નરાણાં ચ (૩૪૦) ગન્ધર્વાણાં ચ કારણમ્ ॥ ૫૮ ॥

નદાનાં કારણં ચૈવ નદીનાં કારણં પરમ્ ।
કારણં ચ સમુદ્રાણાં વૃક્ષાણાં કારણં તથા ॥ ૫૯ ॥

કારણં વીરુધાં ચૈવ લોકાનાં કારણં તથા ।
પાતાલકારણં ચૈવ દેવાનાં કારણં તથા ॥ ૬૦ ॥

સર્પાણાં કારણં ચૈવ (૩૫૦) શ્રેયસાં કારણં તથા ।
પશૂનાં કારણં ચૈવ સર્વેષાં કારણં તથા ॥ ૬૧ ॥

દેહાત્મા ચેન્દ્રિયાત્મા ચ આત્મા બુદ્ધેસ્તથૈવ ચ ।
મનસશ્ચ તથૈવાત્મા ચાત્માહઙ્કારચેતસઃ ॥ ૬૨ ॥

જાગ્રતઃ સ્વપતશ્ચાત્મા (૩૬૦) મહદાત્મા પરસ્તથા ।
પ્રધાનસ્ય પરાત્મા ચ આકાશાત્મા હ્યપાં તથા ॥ ૬૩ ॥

પૃથિવ્યાઃ પરમાત્મા ચ રસસ્યાત્મા તથૈવ ચ । var વયસ્યાત્મા
ગન્ધસ્ય પરમાત્મા ચ રૂપસ્યાત્મા પરસ્તથા ॥ ૬૪ ॥

શબ્દાત્મા ચૈવ (૩૭૦) વાગાત્મા સ્પર્શાત્મા પુરુષસ્તથા ।
શ્રોત્રાત્મા ચ ત્વગાત્મા ચ જિહ્વાયાઃ પરમસ્તથા ॥ ૬૫ ॥

ઘ્રાણાત્મા ચૈવ હસ્તાત્મા પાદાત્મા પરમસ્તથા (૩૮૦) ।
ઉપસ્થસ્ય તથૈવાત્મા પાય્વાત્મા પરમસ્તથા ॥ ૬૬ ॥

ઇન્દ્રાત્મા ચૈવ બ્રહ્માત્મા રુદ્રાત્મા ચ મનોસ્તથા । var શાન્તાત્મા
દક્ષપ્રજાપતેરાત્મા સત્યાત્મા પરમસ્તથા ॥ ૬૭॥

ઈશાત્મા (૩૯૦) પરમાત્મા ચ રૌદ્રાત્મા મોક્ષવિદ્યતિઃ ।
યત્નવાંશ્ચ તથા યત્નશ્ચર્મી ખડ્ગી મુરાન્તકઃ ॥ ૬૮॥ var ખડ્ગ્યસુરા
હ્રીપ્રવર્તનશીલશ્ચ યતીનાં ચ હિતે રતઃ ।
યતિરૂપી ચ (૪૦૦) યોગી ચ યોગિધ્યેયો હરિઃ શિતિઃ ॥ ૬૯॥

સંવિન્મેધા ચ કાલશ્ચ ઊષ્મા વર્ષા મતિસ્તથા (૪૧૦) । var નતિસ્તથા
સંવત્સરો મોક્ષકરો મોહપ્રધ્વંસકસ્તથા ॥ ૭૦॥

મોહકર્તા ચ દુષ્ટાનાં માણ્ડવ્યો વડવામુખઃ ।
સંવર્તઃ કાલકર્તા ચ ગૌતમો ભૃગુરઙ્ગિરાઃ (૪૨૦) ॥ ૭૧॥ var સંવર્તકઃ કાલકર્તા
અત્રિર્વસિષ્ઠઃ પુલહઃ પુલસ્ત્યઃ કુત્સ એવ ચ ।
યાજ્ઞવલ્ક્યો દેવલશ્ચ વ્યાસશ્ચૈવ પરાશરઃ ॥ ૭૨॥

શર્મદશ્ચૈવ (૪૩૦) ગાઙ્ગેયો હૃષીકેશો બૃહચ્છ્રવાઃ ।
કેશવઃ ક્લેશહન્તા ચ સુકર્ણઃ કર્ણવર્જિતઃ ॥ ૭૩॥

નારાયણો મહાભાગઃ પ્રાણસ્ય પતિરેવ ચ (૪૪૦) ।
અપાનસ્ય પતિશ્ચૈવ વ્યાનસ્ય પતિરેવ ચ ॥ ૭૪॥

ઉદાનસ્ય પતિઃ શ્રેષ્ઠઃ સમાનસ્ય પતિસ્તથા ।
શબ્દસ્ય ચ પતિઃ શ્રેષ્ઠઃ સ્પર્શસ્ય પતિરેવ ચ ॥ ૭૫॥

રૂપાણાં ચ પતિશ્ચાદ્યઃ ખડ્ગપાણિર્હલાયુધઃ (૪૫૦) ।
ચક્રપાણિઃ કુણ્ડલી ચ શ્રીવત્સાઙ્કસ્તથૈવ ચ ॥ ૭૬॥

પ્રકૃતિઃ કૌસ્તુભગ્રીવઃ પીતામ્બરધરસ્તથા ।
સુમુખો દુર્મુખશ્ચૈવ મુખેન તુ વિવર્જિતઃ ॥ ૭૭॥

અનન્તોઽનન્તરૂપશ્ચ (૪૬૧) સુનખઃ સુરમન્દરઃ ।
સુકપોલો વિભુર્જિષ્ણુર્ભ્રાજિષ્ણુશ્ચેષુધીસ્તથા ॥ ૭૮॥

હિરણ્યકશિપોર્હન્તા હિરણ્યાક્ષવિમર્દકઃ (૪૭૦) ।
નિહન્તા પૂતનાયાશ્ચ ભાસ્કરાન્તવિનાશનઃ ॥ ૭૯॥

કેશિનો દલનશ્ચૈવ મુષ્ટિકસ્ય વિમર્દકઃ ।

કંસદાનવભેત્તા ચ ચાણૂરસ્ય પ્રમર્દકઃ ॥ ૮૦॥

અરિષ્ટસ્ય નિહન્તા ચ અક્રૂરપ્રિય એવ ચ ।
અક્રૂરઃ ક્રૂરરૂપશ્ચ (૪૮૦) અક્રૂરપ્રિયવન્દિતઃ ॥ ૮૧॥

ભગહા ભગવાન્ભાનુસ્તથા ભાગવતઃ સ્વયમ્ ।
ઉદ્ધવશ્ચોદ્ધવસ્યેશો હ્યુદ્ધવેન વિચિન્તિતઃ ॥ ૮૨॥

ચક્રધૃક્ચઞ્ચલશ્ચૈવ (૪૯૦) ચલાચલવિવર્જિતઃ ।
અહઙ્કારો મતિશ્ચિત્તં ગગનં પૃથિવી જલમ્ ॥ ૮૩॥

વાયુશ્ચક્ષુસ્તથા શ્રોત્રં (૫૦૦) જિહ્વા ચ ઘ્રાણમેવ ચ ।
વાક્પાણિપાદજવનઃ પાયૂપસ્થસ્તથૈવ ચ ॥ ૮૪॥

શઙ્કરશ્ચૈવ શર્વશ્ચ ક્ષાન્તિદઃ ક્ષાન્તિકૃન્નરઃ (૫૧૧) ।
ભક્તપ્રિયસ્તથા ભર્તા ભક્તિમાન્ભક્તિવર્ધનઃ ॥ ૮૫॥

ભક્તસ્તુતો ભક્તપરઃ કીર્તિદઃ કીર્તિવર્ધનઃ ।
કીર્તિર્દીપ્તિઃ (૫૨૦) ક્ષમા કાન્તિર્ભક્તશ્ચૈવ (૫૩૦) દયાપરા ॥ ૮૬॥

દાનં દાતા ચ કર્તા ચ દેવદેવપ્રિયઃ શુચિઃ ।
શુચિમાન્સુખદો (૫૩૧) મોક્ષઃ કામશ્ચાર્થઃ સહસ્રપાત્ ॥ ૮૭॥

સહસ્રશીર્ષા વૈદ્યશ્ચ મોક્ષદ્વારસ્તથૈવ ચ ।
પ્રજાદ્વારં સહસ્રાક્ષઃ સહસ્રકર એવ ચ (૫૪૦) ॥ ૮૮॥ var સહસ્રાન્તઃ
શુક્રશ્ચ સુકિરીટી ચ સુગ્રીવઃ કૌસ્તુભસ્તથા ।
પ્રદ્યુમ્નશ્ચાનિરુદ્ધશ્ચ હયગ્રીવશ્ચ સૂકરઃ ॥ ૮૯॥

મત્સ્યઃ પરશુરામશ્ચ (૫૫૦) પ્રહ્લાદો બલિરેવચ ।
શરણ્યશ્ચૈવ નિત્યશ્ચ બુદ્ધો મુક્તઃ શરીરભૃત્ ॥ ૯૦॥

ખરદૂષણહન્તા ચ રાવણસ્ય પ્રમર્દનઃ ।
સીતાપતિશ્ચ (૫૬૦) વર્ધિષ્ણુર્ભરતશ્ચ તથૈવ ચ ॥ ૯૧॥

કુમ્ભેન્દ્રજિન્નિહન્તા ચ કુમ્ભકર્ણપ્રમર્દનઃ ।
નરાન્તકાન્તકશ્ચૈવ દેવાન્તકવિનાશનઃ ॥ ૯૨॥

દુષ્ટાસુરનિહન્તા ચ શમ્બરારિસ્તથૈવ ચ ।
નરકસ્ય નિહન્તા ચ ત્રિશીર્ષસ્ય વિનાશનઃ (૫૭૦) ॥ ૯૩॥

યમલાર્જુનભેત્તા ચ તપોહિતકરસ્તથા ।

વાદિત્રશ્ચૈવ વાદ્યં ચ બુદ્ધશ્ચૈવ વરપ્રદઃ ॥ ૯૪॥

સારઃ સારપ્રિયઃ સૌરઃ કાલહન્તા નિકૃન્તનઃ (૫૮૦) ।
અગસ્ત્યો દેવલશ્ચૈવ નારદો નારદપ્રિયઃ ॥ ૯૫॥

પ્રાણોઽપાનસ્તથા વ્યાનો રજઃ સત્ત્વં તમઃ (૫૯૦) શરત્ ।
ઉદાનશ્ચ સમાનશ્ચ ભેષજં ચ ભિષક્તથા ॥ ૯૬॥

કૂટસ્થઃ સ્વચ્છરૂપશ્ચ સર્વદેહવિવર્જિતઃ ।
ચક્ષુરિન્દ્રિયહીનશ્ચ વાગિન્દ્રિયવિવર્જિતઃ (૬૦૦) ॥ ૯૭॥

હસ્તેન્દ્રિયવિહીનશ્ચ પાદાભ્યાં ચ વિવર્જિતઃ ।
પાયૂપસ્થવિહીનશ્ચ મરુતાપવિવર્જિતઃ ॥ ૯૮॥ var મહાતપોવિસર્જિતઃ
પ્રબોધેન વિહીનશ્ચ બુદ્ધ્યા ચૈવ વિવર્જિતઃ ।
ચેતસા વિગતશ્ચૈવ પ્રાણેન ચ વિવર્જિતઃ ॥ ૯૯॥

અપાનેન વિહીનશ્ચ વ્યાનેન ચ વિવર્જિતઃ (૬૧૦) ।
ઉદાનેન વિહીનશ્ચ સમાનેન વિવર્જિતઃ ॥ ૧૦૦॥

આકાશેન વિહીનશ્ચ વાયુના પરિવર્જિતઃ ।
અગ્નિના ચ વિહીનશ્ચ ઉદકેન વિવર્જિતઃ ॥ ૧૦૧॥

પૃથિવ્યા ચ વિહીનશ્ચ શબ્દેન ચ વિવર્જિતઃ ।
સ્પર્શેન ચ વિહીનશ્ચ સર્વરૂપવિવર્જિતઃ (૬૨૦) ॥ ૧૦૨॥

રાગેણ વિગતશ્ચૈવ અઘેન પરિવર્જિતઃ ।
શોકેન રહિતશ્ચૈવ વચસા પરિવર્જિતઃ ॥ ૧૦૩॥

રજોવિવર્જિતશ્ચૈવ વિકારૈઃ ષડ્ભિરેવ ચ ।
કામેન વર્જિતશ્ચૈવ ક્રોધેન પરિવર્જિતઃ ॥ ૧૦૪॥

લોભેન વિગતશ્ચૈવ દમ્ભેન ચ વિવર્જિતઃ ।
સૂક્ષ્મશ્ચૈવ (૬૩૦) સુસૂક્ષ્મશ્ચ સ્થૂલાત્સ્થૂલતરસ્તથા ॥ ૧૦૫॥

વિશારદો બલાધ્યક્ષઃ સર્વસ્ય ક્ષોભકસ્તથા ।
પ્રકૃતેઃ ક્ષોભકશ્ચૈવ મહતઃ ક્ષોભકસ્તથા ॥ ૧૦૬॥

ભૂતાનાં ક્ષોભકશ્ચૈવ બુદ્ધેશ્ચ ક્ષોભકસ્તથા ।
ઇન્દ્રિયાણાં ક્ષોભકશ્ચ (૬૪૦) વિષયક્ષોભકસ્તથા ॥ ૧૦૭॥

બ્રહ્મણઃ ક્ષોભકશ્ચૈવ રુદ્રસ્ય ક્ષોભકસ્તથા ।

અગમ્યશ્ચક્ષુરાદેશ્ચ શ્રોત્રાગમ્યસ્તથૈવ ચ ॥ ૧૦૮॥

ત્વચા ન ગમ્યઃ કૂર્મશ્ચ જિહ્વાગ્રાહ્યસ્તથૈવ ચ ।
ઘ્રાણેન્દ્રિયાગમ્ય એવ વાચાગ્રાહ્યસ્તથૈવ ચ (૬૫૦) ॥ ૧૦૯॥

અગમ્યશ્ચૈવ પાણિભ્યાં પદાગમ્યસ્તથૈવ ચ । var પાદાગમ્ય
અગ્રાહ્યો મનસશ્ચૈવ બુદ્ધ્યા ગ્રાહ્યો હરિસ્તથા ॥ ૧૧૦॥

અહમ્બુદ્ધ્યા તથા ગ્રાહ્યશ્ચેતસા ગ્રાહ્ય એવ ચ ।
શઙ્ખપાણિરવ્યયશ્ચ ગદાપાણિસ્તથૈવ ચ (૬૬૦) ॥ ૧૧૧॥

શાર્ઙ્ગપાણિશ્ચ કૃષ્ણશ્ચ જ્ઞાનમૂર્તિઃ પરન્તપઃ ।
તપસ્વી જ્ઞાનગમ્યો હિ જ્ઞાની જ્ઞાનવિદેવ ચ ॥ ૧૧૨॥

જ્ઞેયશ્ચ જ્ઞેયહીનશ્ચ (૬૭૦) જ્ઞપ્તિશ્ચૈતન્યરૂપકઃ ।
ભાવો ભાવ્યો ભવકરો ભાવનો ભવનાશનઃ ॥ ૧૧૩॥

ગોવિન્દો ગોપતિર્ગોપઃ (૬૮૦) સર્વગોપીસુખપ્રદઃ ।
ગોપાલો ગોગતિશ્ચૈવ ગોમતિર્ગોધરસ્તથા ॥ ૧૧૪॥ var ગોપતિ
ઉપેન્દ્રશ્ચ નૃસિંહશ્ચ શૌરિશ્ચૈવ જનાર્દનઃ ।
આરણેયો (૬૯૦) બૃહદ્ભાનુર્બૃહદ્દીપ્તિસ્તથૈવ ચ ॥ ૧૧૫॥

દામોદરસ્ત્રિકાલશ્ચ કાલજ્ઞઃ કાલવર્જિતઃ ।
ત્રિસન્ધ્યો દ્વાપરં ત્રેતા પ્રજાદ્વારં (૭૦૦) ત્રિવિક્રમઃ ॥ ૧૧૬॥

વિક્રમો દણ્ડહસ્તશ્ચ હ્યેકદણ્ડી ત્રિદણ્ડધૃક્ । var દરહસ્તશ્ચ
સામભેદસ્તથોપાયઃ સામરૂપી ચ સામગઃ ॥ ૧૧૭॥

સામવેદોઃ (૭૧૦) હ્યથર્વશ્ચ સુકૃતઃ સુખરૂપકઃ ।
અથર્વવેદવિચ્ચૈવ હ્યથર્વાચાર્ય એવ ચ ॥ ૧૧૮॥

ઋગ્રૂપી ચૈવ ઋગ્વેદઃ ઋગ્વેદેષુ પ્રતિષ્ઠિતઃ ।
યજુર્વેત્તા યજુર્વેદો (૭૨૦) યજુર્વેદવિદેકપાત્ ॥ ૧૧૯॥

બહુપાચ્ચ સુપાચ્ચૈવ તથૈવ ચ સહસ્રપાત્ ।
ચતુષ્પાચ્ચ દ્વિપાચ્ચૈવ સ્મૃતિર્ન્યાયો યમો બલી (૭૩૦) ॥ ૧૨૦॥

સન્ન્યાસી ચૈવ સન્ન્યાસશ્ચતુરાશ્રમ એવ ચ ।
બ્રહ્મચારી ગૃહસ્થશ્ચ વાનપ્રસ્થશ્ચ ભિક્ષુકઃ ॥ ૧૨૧॥

બ્રાહ્મણઃ ક્ષત્રિયો વૈશ્યઃ (૭૪૦) શૂદ્રો વર્ણસ્તથૈવ ચ ।

શીલદઃ શીલસમ્પન્નો દુઃશીલપરિવર્જિતઃ ॥ ૧૨૨॥

મોક્ષોઽધ્યાત્મસમાવિષ્ટઃ સ્તુતિઃ સ્તોતા ચ પૂજકઃ ।
પૂજ્યો (૭૫૦) વાક્કરણં ચૈવ વાચ્યશ્ચૈવ તુ વાચકઃ ॥ ૧૨૩॥

વેત્તા વ્યાકરણશ્ચૈવ વાક્યં ચૈવ ચ વાક્યવિત્ ।
વાક્યગમ્યસ્તીર્થવાસી (૭૬૦) તીર્થસ્તીર્થી ચ તીર્થવિત્ ॥ ૧૨૪॥

તીર્થાદિભૂતઃ સાઙ્ખ્યશ્ચ નિરુક્તં ત્વધિદૈવતમ્ ।
પ્રણવઃ પ્રણવેશશ્ચ પ્રણવેન પ્રવન્દિતઃ (૭૭૦) ॥ ૧૨૫॥

પ્રણવેન ચ લક્ષ્યો વૈ ગાયત્રી ચ ગદાધરઃ ।
શાલગ્રામનિવાસી ચ (૭૮૦) શાલગ્રામસ્તથૈવ ચ ॥ ૧૨૬॥

જલશાયી યોગશાયી શેષશાયી કુશેશયઃ ।
મહીભર્તા ચ (૭૯૦) કાર્યં ચ કારણં પૃથિવીધરઃ ॥ ૧૨૭॥

પ્રજાપતિઃ શાશ્વતશ્ચ કામ્યઃ કામયિતા વિરાટ્ ।
સમ્રાટ્પૂષા (૮૦૦) તથા સ્વર્ગો રથસ્થઃ સારથિર્બલમ્ ॥ ૧૨૮॥

ધની ધનપ્રદો ધન્યો યાદવાનાં હિતે રતઃ ।
અર્જુનસ્ય પ્રિયશ્ચૈવ હ્યર્જુનો (૮૧૦) ભીમ એવ ચ ॥ ૧૨૯॥

પરાક્રમો દુર્વિષહઃ સર્વશાસ્ત્રવિશારદઃ ।
સારસ્વતો મહાભીષ્મઃ પારિજાતહરસ્તથા ॥ ૧૩૦॥

અમૃતસ્ય પ્રદાતા ચ ક્ષીરોદઃ ક્ષીરમેવ ચ (૮૨૦) ।
ઇન્દ્રાત્મજસ્તસ્ય ગોપ્તા ગોવર્ધનધરસ્તથા ॥ ૧૩૧॥

કંસસ્ય નાશનસ્તદ્વદ્ધસ્તિપો હસ્તિનાશનઃ ।
શિપિવિષ્ટઃ પ્રસન્નશ્ચ સર્વલોકાર્તિનાશનઃ ॥ ૧૩૨॥

મુદ્રો (૮૩૦) મુદ્રાકરશ્ચૈવ સર્વમુદ્રાવિવર્જિતઃ ।
દેહી દેહસ્થિતશ્ચૈવ દેહસ્ય ચ નિયામકઃ ॥ ૧૩૩॥

શ્રોતા શ્રોત્રનિયન્તા ચ શ્રોતવ્યઃ શ્રવણસ્તથા ।
ત્વક્સ્થિતશ્ચ (૮૪૦) સ્પર્શયિતા સ્પૃશ્યં ચ સ્પર્શનં તથા ॥ ૧૩૪॥

રૂપદ્રષ્ટા ચ ચક્ષુઃસ્થો નિયન્તા ચક્ષુષસ્તથા ।
દૃશ્યં ચૈવ તુ જિહ્વાસ્થો રસજ્ઞશ્ચ નિયામકઃ (૮૫૦) ॥ ૧૩૫॥

ઘ્રાણસ્થો ઘ્રાણકૃદ્ઘ્રાતા ઘ્રાણેન્દ્રિયનિયામકઃ ।
વાક્સ્થો વક્તા ચ વક્તવ્યો વચનં વાઙ્નિયામકઃ ॥ ૧૩૬॥

પ્રાણિસ્થઃ (૮૬૦) શિલ્પકૃચ્છિલ્પો હસ્તયોશ્ચ નિયામકઃ ।
પદવ્યશ્ચૈવ ગન્તા ચ ગન્તવ્યં ગમનં તથા ॥ ૧૩૭॥

નિયન્તા પાદયોશ્ચૈવ પાદ્યભાક્ચ વિસર્ગકૃત્ (૮૭૦) ।
વિસર્ગસ્ય નિયન્તા ચ હ્યુપસ્થસ્થઃ સુખસ્તથા ॥ ૧૩૮॥

ઉપસ્થસ્ય નિયન્તા ચ તદાનન્દકરશ્ચ હ ।
શત્રુઘ્નઃ કાર્તવીર્યશ્ચ દત્તાત્રેયસ્તથૈવ ચ ॥ ૧૩૯॥

અલર્કસ્ય હિતશ્ચૈવ કાર્તવીર્યનિકૃન્તનઃ (૮૮૦) ।
કાલનેમિર્મહાનેમિર્મેઘો મેઘપતિસ્તથા ॥ ૧૪૦॥

અન્નપ્રદોઽન્નરૂપી ચ હ્યન્નાદોઽન્નપ્રવર્તકઃ ।
ધૂમકૃદ્ધૂમરૂપશ્ચ (૮૯૦) દેવકીપુત્ર ઉત્તમઃ ॥ ૧૪૧॥

દેવક્યા નન્દનો નન્દો રોહિણ્યાઃ પ્રિય એવ ચ ।
વસુદેવપ્રિયશ્ચૈવ વસુદેવસુતસ્તથા ॥ ૧૪૨॥

દુન્દુભિર્હાસરૂપશ્ચ પુષ્પહાસસ્તથૈવ ચ (૯૦૦) ।
અટ્ટહાસપ્રિયશ્ચૈવ સર્વાધ્યક્ષઃ ક્ષરોઽક્ષરઃ ॥ ૧૪૩॥

અચ્યુતશ્ચૈવ સત્યેશઃ સત્યાયાશ્ચ પ્રિયો વરઃ ।
રુક્મિણ્યાશ્ચ પતિશ્ચૈવ રુક્મિણ્યા વલ્લભસ્તથા ॥ ૧૪૪॥

ગોપીનાં વલ્લભશ્ચૈવ (૯૧૦) પુણ્યશ્લોકશ્ચ વિશ્રુતઃ ।
વૃષાકપિર્યમો ગુહ્યો મઙ્ગલશ્ચ બુધસ્તથા ॥ ૧૪૫॥

રાહુઃ કેતુર્ગ્રહો ગ્રાહો (૯૨૦) ગજેન્દ્રમુખમેલકઃ ।
ગ્રાહસ્ય વિનિહન્તા ચ ગ્રામીણી રક્ષકસ્તથા ॥ ૧૪૬॥

કિન્નરશ્ચૈવ સિદ્ધશ્ચ છન્દઃ સ્વચ્છન્દ એવ ચ ।
વિશ્વરૂપો વિશાલાક્ષો (૯૩૦) દૈત્યસૂદન એવ ચ ॥ ૧૪૭॥

અનન્તરૂપો ભૂતસ્થો દેવદાનવસંસ્થિતઃ ।
સુષુપ્તિસ્થઃ સુષુપ્તિશ્ચ સ્થાનં સ્થાનાન્ત એવ ચ ॥ ૧૪૮॥

જગત્સ્થશ્ચૈવ જાગર્તા સ્થાનં જાગરિતં તથા (૯૪૦) ।
સ્વપ્નસ્થઃ સ્વપ્નવિત્સ્વપ્નસ્થાનં સ્વપ્નસ્તથૈવ ચ ॥ ૧૪૯॥

var સ્વપ્નસ્થઃ સ્વપ્નવિત્સ્વપ્નં સ્થાનસ્થઃ સુસ્થ એવ ચ
જાગ્રત્સ્વપ્નસુષુપ્તેશ્ચ વિહીનો વૈ ચતુર્થકઃ ।
વિજ્ઞાનં વેદ્યરૂપં ચ જીવો જીવયિતા તથા (૯૫૦) ॥ ૧૫૦ ॥ var ચૈત્રરૂપશ્ચ
ભુવનાધિપતિશ્ચૈવ ભુવનાનાં નિયામકઃ ।
પાતાલવાસી પાતાલં સર્વજ્વરવિનાશનઃ ॥ ૧૫૧ ॥

પરમાનન્દરૂપી ચ ધર્માણાં ચ પ્રવર્તકઃ ।
સુલભો દુર્લભશ્ચૈવ પ્રાણાયામપરસ્તથા (૯૬૦) ॥ ૧૫૨ ॥

પ્રત્યાહારો ધારકશ્ચ પ્રત્યાહારકરસ્તથા ।
પ્રભા કાન્તિસ્તથા હ્યર્ચિઃ શુદ્ધસ્ફટિકસન્નિભઃ ॥ ૧૫૩ ॥

અગ્રાહ્યશ્ચૈવ ગૌરશ્ચ સર્વઃ (૯૭૦) શુચિરભિષ્ટુતઃ ।
વષટ્કારો વષડ્વૌષટ્સ્વધા સ્વાહા રતિસ્તથા ॥ ૧૫૪ ॥

પક્તા નન્દયિતા (૯૮૦) ભોક્તા બોદ્ધા ભાવયિતા તથા ।
જ્ઞાનાત્મા ચૈવ દેહાત્મા ભૂમા સર્વેશ્વરેશ્વરઃ ॥ ૧૫૫ ॥ var ઊહાત્મા
નદી નન્દી ચ નન્દીશો (૯૯૦) ભારતસ્તરુનાશનઃ ।
ચક્રપઃ શ્રીપતિશ્ચૈવ નૃપાણાં ચક્રવર્તિનામ્ ॥ ૧૫૬ ॥ var નૃપશ્ચ
ઈશશ્ચ સર્વદેવાનાં દ્વારકાસંસ્થિતસ્તથા । var સ્વાવકાશં સ્થિત
પુષ્કરઃ પુષ્કરાધ્યક્ષઃ પુષ્કરદ્વીપ એવ ચ (૧૦૦૦) ॥ ૧૫૭ ॥

ભરતો જનકો જન્યઃ સર્વાકારવિવર્જિતઃ ।
નિરાકારો નિર્નિમિત્તો નિરાતઙ્કો નિરાશ્રયઃ (૧૦૦૮) ॥ ૧૫૮ ॥

ઇતિ નામસહસ્રં તે વૃષભધ્વજ કીર્તિતમ્ ।
દેવસ્ય વિષ્ણોરીશસ્ય સર્વપાપવિનાશનમ્ ॥ ૧૫૯ ॥

પઠન્દ્વિજશ્ચ વિષ્ણુત્વં ક્ષત્રિયો જયમાપ્નુયાત્ ।
વૈશ્યો ધનં સુખં શૂદ્રો વિષ્ણુભક્તિસમન્વિતઃ ॥ ૧૬૦ ॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
શ્રીવિષ્ણુસહસ્રનામસ્તોત્રનિરૂપણં નામ પઞ્ચદશોઽધ્યાયઃ ॥

ગરુડપુરાણ । પૂર્વખણ્ડ । અધ્યાય ૧૫/૨-૧૬૦ ॥

garuDapurANa . pUrvakhaNDa . adhyAya 15/2-160..

Proofread by PSA Easwaran

*viShNusahasranAmastotram from Garuda Purana*

pdf was typeset on October 3, 2024

Please send corrections to *sanskrit@cheerful.com*